# Rama Ashtakam

# रामाष्टकम् १०

## Document Information

Text title : Rama Ashtakam

File name : rAmAShTakam10.itx

Category : raama, moropanta, aShTaka

Location : doc_raama

Author : Mayurakavi or Moropanta

Proofread by : Rajesh Thyagarajan

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : December 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2023

*sanskritdocuments.org*

# रामाष्टकम् १०

(प्रथमम्)
(स्त्रग्विणीवृत्तं)
यत्प्रसादाद्विपद्बन्धुरप्यद्भुतं राज्यमिन्द्रादिभिर्दुर्लभं शाश्वतं ।
प्राप कृत्वा सकृत्पादयोर्वंदनं चिन्तयामः सदा तं सदानन्दनं(१) ॥ १॥

सज्जनानां प्रियं दुर्जनानामपि स्वान्तसन्तोषदं स्वाश्रितानां समं ।
सर्वतापप्रणाशक्षमं चन्दनं चिन्तयामः सुमित्रासखीनन्दनम् ॥ २॥

पुत्रतामेत्य चक्रे खरांशोर्विधोर्यों जयं तस्य न स्वामिनोप्युश्चकैः ।
जन्मदात्सर्वलोकेषु दिक्स्यन्दनं चिन्तयामः सदा तं रघोनन्दनम् ॥ ३॥

क्ष्माभृतां पालकं ध्यक्षमत्यद्भुतं चापबाणैकपाणिं तपस्विप्रियं ।
एकपत्नीव्रतं विश्वसङ्क्रन्दनं चिन्तयामोऽजसूनोः(२) प्रियं नन्दनम् ॥ ४॥

सादरं येद्धनुर्व्यानिनादो(३) गुरुर्नागभूदेवदेवाङ्गनाराक्षसीः ।
गीतमध्यापयामास चाक्रन्दनं चिन्तयामोऽद्य सख्युर्हरेर्नन्दनम् ॥ ५॥

शिश्रिये यत्पुरोपाटवी(४) केवलं नैव सर्वर्तुभिर्योगिभिश्चोत्सुकैः ।
स्वर्गिभिश्चापि हित्वा प्रियं नदनं(५) चिन्तयामः सदा तं सदानन्दनम् ॥ ६॥

येन्मुखं(६) प्रेक्षतां नाकिनामेव नो विस्मृतं पक्ष्मभिर्भूगतानामपि ।
चित्रसन्मित्रतामीयुषां स्पन्दनं चिन्तयामः सदा तं सदानन्दनम् ॥ ७॥

अर्थिचेतश्चकोरामृतांशुर्मुखं साधु यस्यावदत्सर्ववर्णेष्वपि ।
एकमेवेति मय्यङ्गमानन्दनं चिन्तयामः सदा तं सदानन्दनम् ॥ ८॥

इति श्रीरामनन्दनमयूरेश्वरकृतं रामाष्टकं सम्पूर्णम् ।

टिप्पणि
१। सतामानन्दनं श्रीरामचन्द्रम् ।
२। अजसूनोः दशरथस्य ।

३। गुरुर्यद्धर्निज्यानिनादो नागभूदेवदेवाङ्गनाः गीतं
राक्षसीश्चाक्रन्दनमध्यापयामास तं चिन्तयामः इति योजनीयम् ।
४। यत्पुरस्योपाटवी अयोध्याया उद्यानमित्यर्थः ।
५। नन्दनवनम् ।
६। “यन्मुखं प्रेक्षतां चित्रसन्मित्रतामीयुषां स्वर्गिणामेव नो विस्मृतम् । पक्ष्मभिर्भूगतानामपि स्पन्दनं” इत्यन्यः कविलिखितः पाठः ॥

Proofread by Rajesh Thyagarajan

---

*Rama Ashtakam*
pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*